CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महेन्द्र-संस्कृत-विश्वविद्यालयः

वाल्मीकि विद्यापीठ

त्रिवार्षिक-शास्त्रिस्तरीयः पाठ्यक्रमः

(तृतीयखण्डः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महेन्द्र-संस्कृत-विश्वविद्यालयः

शास्त्रिस्तरीयः पाठ्यक्रमः
(तृतीयखण्डस्य)

प्रकाशकः
महेन्द्र-संस्कृत-विश्वविद्यालयः
बेलझुण्डी, दाङ्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्करणम् - प्रथमम्

प्रकाशितप्रति - २०००

प्रकाशनकालः - २०५४ आषाढः

मूल्यम् - . ३३।-

मुद्रकः - नेपाल प्रिन्टर्स एण्ड ट्रेडर्स सहकारी लि.
डिल्लीबजार, काठमाडौं ।
फोन नं. ४२७४५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयसूची
(तृतीयखण्डस्य)

क्र.सं	विषय	पृष्ठाङ्काः
१.	शुक्लयजुर्वेदः	१-७
२.	नव्यव्याकरणम्	८-१३
३.	सिद्धान्तज्यौतिषम्	१४-१८
४.	फलितज्यौतिषम्	१९-२१
५.	नव्यन्यायः	२२-२६
६.	प्राचीनन्यायवैशेषिकम्	२७-३३
७.	साहित्यम्	३४-४०
८.	इतिहासपुराणम्	४१-४६
९.	पूर्वमीमांसा	४७-५५
१०.	शाङ्करवेदान्तः	५६-६०
११.	धर्मशास्त्रम्	६१-६४
१२.	सर्वदर्शनम्	६५-७२
१३.	तन्त्रम्	७३-७७
१४.	बौद्धदर्शनम्	७८-८२
१५.	नेपाली "ख"	८३-९४
१६.	Political Science	९५-१००
१७.	Economics	१०१-१०९
१८.	हिन्दी	११०-११२
१९.	मैथिली	११३-११६
२०.	Optional English	११७-१२१
२१.	Mathematics	१२२-१४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिवार्षिक-शास्त्रिस्तरीय-पाठयक्रमस्य संक्षिप्तविवरणम्

क्षेत्रम्	विषयाः	प्रथमखण्डे		द्वितीयखण्डे		तृतीयखण्डे	
		पत्रम्	पूर्णाङ्कः	पत्रम्	पूर्णाङ्कः	पत्रम	पूर्णाङ्कः
अनिवार्यम्	अंग्रेजी/वै.सं-रचना	प्रथमम्	१००	द्वितीयम्	१००	-	-
	नेपाली	-	१००	-	-	-	-
	संस्कृतम्	-	१००	-	१००	-	-
क वर्गे	शुक्लयजुर्वेदः	प्रथमम्	१००	तृतीयम्	१००	पञ्चमम्	१००
	नव्यव्याकरणम्	द्वितीयम्	१००	चतुर्थम्	१००	षष्ठम्	१००
	साहित्यम्						
	सिद्धान्तज्यौतिषम्						
	फलितज्यौतिषम्						
	प्राचीनन्यायः						
	नव्यन्यायः						
	शाङ्करवेदान्तः						
	पूर्वमीमांसा						
	इतिहासपुराणम्						
	सर्वदर्शनम्						
	धर्मशास्त्रम्						
	तन्त्रम्						
	बौद्धदर्शनम्						
ख वर्गे	नेपाली/अंग्रेजी	प्रथमम्	१००	तृतीयम्	१००	पञ्चमम्	१००
	हिन्दी/मैथिली	द्वितीयम्	१००	चतुर्थम्	१००	षष्ठम्	१००
	अर्थशास्त्र,						
	गणित/						
	राजनीतिशास्त्र						

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुक्लयजुर्वेदः

स्तरगतविषयशिक्षणोद्देश्यम् -

१- इष्टिपशुसोमयागमन्त्रार्थज्ञानयुताया जनशक्तेरुत्पादनम्,

२- श्रौताधानसहितसाङ्गश्रौतयज्ञस्वरूपज्ञानोत्पादनम्,

३- स्वरवैदिकप्रयोगज्ञानोत्पादनम्,

४- स्मार्ताधानकर्मसंस्काराणां प्रयोगात्मकशास्त्रीयज्ञानोत्पादनम्,

५- वेदशाखाविषयकज्ञानोत्पादनम्,

६- छान्दसस्वरसंस्कारनियमविषयकज्ञानोत्पादनम्,

७ - संहितापदक्रमसहितजटाद्यष्टविकृतिपाठनियमज्ञानम्,

८- वैदिकशब्दकोषतन्निवर्चनदेवतापदार्थादिज्ञानार्जनम्,

९- विधिभागगतविशेषज्ञानोत्पादनम् ।

पञ्चमं पत्रम् **पूर्णाङ्काः १००**

पाठ्यांशनाम - अग्नीषोमीयादिचरकसौत्रामण्यन्तनिरूपणम् ।

प्रकरणविभाजनम्

१-	अग्नीषोमाद्यादित्यग्रहणान्तमन्त्रार्थाः	३०
२-	वाजपेयादिचरकसौत्रामण्यन्ता मन्त्रार्थाः	१०
३-	पिण्डपितृयज्ञादिनिरूपणम्	२०
४-	सोमयागनिरूपणम्	३०
५-	अग्निष्टोमप्रयोगज्ञानम्	१०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाठ्यवस्तुविवरणम्

(क) प्रकरणे

शुक्लयजुर्वेदमाध्यन्दिनसंहितायाः महीधरभाष्यसहितेषु ६-८ अध्यायेषु निर्दिष्टा ६० मन्त्रार्था :।

ते च यथा - १, २, ४, ५, ६, ७, ८, १२, १३, २३, २५, २७, २८, २९, ३१, ३४, ३५, ३६, ३७, तमश्चेति संहत्य १९ मन्त्रार्थाः।

सप्तमेऽध्याये - १, २, ४, ५, १४, १९, २४, २६, ३४, ४०, ४१, ४२, ४३, ४४, ४५, ४६, ४८, तमश्चेति संहत्य १७ मन्त्रार्थास्तथाचाष्टमेऽध्याये - १, २, ३, ६, ७, ८, ११, १२, १४, २२, २७, २८, २९, ३१, ३२, ४१, ४२, ४३, ५२, ५५, ५६, ६१, ६२, ६३, तमश्चेति संहत्य २४ मन्त्रार्थाः।

(ख) प्रकरणे

महीधरभाष्यसहिताया माध्यन्दिनसंहितायाः ९-१० अध्याययोर्निर्दिष्टमन्त्रार्थाः

नवमेऽध्याये -१, ६, ७, ८, ११, १४, १५, १६, १८, २१, २५ २९, ३७, ४०।

दशमेऽध्याये - १, २, ३, १०, ११, १२, १३, १५, २४, २६, २७, ३३, ३४, तममन्त्रार्थाश्चेति द्वयोः संहत्य ३० मन्त्रार्थाः।

(ग) प्रकरणे

कर्कभाष्यसहितस्य कात्यायनश्रौतसूत्रस्य ४-६ अध्यायेषु निम्नाङ्किता विषयाः

चतुर्थाध्याये

पिण्डपितृयज्ञ-दर्शेष्टि-धर्मातिदेश-दाक्षायणयज्ञ सर्वकर्म-सूपांशुदेवताऽऽग्रयणान्याधानतनूहविर्विधान-पुनराधान-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वात्सप्रक्षुल्लकबृहदुपस्थानप्रवासाद्युपस्थानाग्निहोत्रहोमविधि-निरूपणानि ।

पञ्चमाध्याये

चातुर्मास्ययज्ञान्तर्गतवैश्वदेवादिपर्वतदङ्गभूतपित्र्येष्टि-त्र्यम्बकेष्टिविधानमित्रविन्देष्टिनिरूपणानि चेति ।

षष्ठाध्याये- निरूढपशुबन्धयागस्य सामान्यपरिचयः, पदार्थनिरूपणञ्चेति ।

(घ) प्रकरणे

कर्कभाष्यसहितस्य कात्यायनश्रौतसूत्रस्य ७-११ अध्यायेषु श्रौतयागानुष्ठानक्रमः, सौमिकाधानाग्निष्टोमकालर्त्विग्-वरणर्त्विग्गणनिरूपणदेवयजनलक्षणमण्डपनिर्माणदीक्षाभेदर्तु-कालादिमर्यादास्थापनयूपच्छेदनाप्सुदीक्षाविधानौदग्रभणहोम-दीक्षाभेदगतव्यवस्थितविभागवाग्विसर्जनदीक्षितव्रतव्यवस्था-प्रायश्चित्तविधिदीक्षितकर्तव्यनिरूपणप्रायणीयेष्टि-दीक्षणीयेष्टिसोमक्रयणलक्षणसोममानसोमपणनपूर्वक-सोमक्रयणसुब्रह्मण्याह्वानकृष्णसारङ्गपश्वान-यनाऽसन्द्याहरणातिथ्येष्टिनिरूपणमदन्त्युपसर्जन्यधिश्रयण-परिधिप्रस्तरविधृतिबर्हिर्विधानतानूनप्त्राज्यग्रहणतानून-प्त्राज्याभिमर्शनसोमाप्यायनप्रवर्ग्योपसदाचरणप्रवृद्धोप-सदन्तर्भावनान्तःपात्यशङ्कुखातनमहावेदिकरणप्रउगोपर-वखननाधिषवणफलकनिधानौदुम्बरीशाखामानतदुच्छ्रयण सदोमण्डपमानस्तोमायनसवनीयपशुविभागयूपवर्धनपशु-बन्धनपत्नीयूपोच्छ्रयणत्वाष्ट्रवानस्पत्यपशुविधानवसतीवरी-ग्रहणतद्द्रोणकलशसमीपासादनसुत्याकर्मक्षुल्लमहाभिषव-सौमिकपात्रासादनसोमाहुतिशेषभक्ष्यप्रकारावभृथेष्टिब्रह्म-कर्मनिरूपणान्ता विषयाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ङ) प्रकरणे

अग्निष्टोमपदार्थक्रमस्तत्राध्वर्यवपद्धतिमनुसृत्याध्वर्युकर्तृक-विशेषकर्मानुष्ठानप्रकारश्चेति ।

पाठ्यग्रन्थाः

१- शुक्लयजुर्वेदमा.संहिताया महीधरभाष्यम् ६-१० अध्यायान्तम् ।

२- कात्यायनश्रौतसूत्रम् (कर्कभाष्योपेतम्) ४-११ अध्यायान्तम् ।

३- अग्निष्टोमपद्धतौ, आध्वर्यवपद्धतिः

सहायकग्रन्थाः

(क) काण्वभाष्यम् ।

(ख) आपस्तम्बश्रौतसूत्रम् ।

(ग) कात्यायनश्रौतसूत्रस्य सरला भूमिका ।

षष्ठं पत्रम् पूर्णाङ्काः १००

पाठ्यांशनाम - छान्दससंस्कारादिवोधपूर्वकमन्त्रब्राह्मणार्थनिरूपणम् ।

प्रकरणविभाजनम्

१-	मन्त्रार्थावगतिः	२०
२-	मन्त्रार्थाऽवगमः	३०
३-	छान्दससंस्कारादिवोधः	२०
४-	अवग्रहादिनिरूपणम्	१०
५-	ऐष्टिकविधिनिरूपणम्	२०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाठ्यवस्तुविवरणम्

(क) प्रकरणे

महीधरभाष्योपेतायाः शुक्लयजुर्वेद्माध्यन्दिनसंहितायाः ११-१२ अध्याययोरधोङ्कितमन्त्रार्थाः

एकदशाध्याये - १-४, ७, १३, १४, १६, २७, ३०, ३३, ३४, ३८, ४२, ४४, ४५, ५०-५२, ५६, ६८, ७०, ७३, ७९, ८०, ८३ तथा

द्वादशाध्याये - १, ३, ९, १०, ११, १२, १४, १८, २२, ३१, ३६, ३७, ३८, ४४, ४८, ५४, ६६, ६७, ७१, ७५, ७६, ७९, ८०, ८५, ८६, ८९, ९५, १००, १०८, ११२, ११४, ११५, ११६, ११७ तमश्चेति द्वयोः संहत्य षष्टिमन्त्रार्थाः ।

(ख) प्रकरणे

महीधरभाष्यसहितायाः माध्यन्दिनसंहितायाः १३-१५ अध्यायेषु निम्नाङ्कितमन्त्रार्थनिरूपणम्

त्रयोदशेऽध्याये - १, ३, ४, ६, ८, १४, १५, १७, १८, २०, २३, २७, २८, २९, ३२, ३३, ३४, ३५, ३६, ३७, ३९, ४० तमश्चेति २२ मन्त्रार्थास्तथा

चतुर्दशाध्याये- १, २, ८, ११, १३, १७, १८, २६ तमश्चेति १० मन्त्रार्थास्तथापञ्चदशाध्याये - १, २, ८, २०, २१, २२, २३, २४, २५, २६, २७, २८, २९, ३०, ३१, ३२, ३५, ३६, ३७, ३८, ४६, ५४, ५५, ५६, ६१, ६२, ६३ तमश्चेति संहत्य २७ मन्त्रार्थाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ग) प्रकरणे

उव्वटभाष्यसहितस्य शु.य.प्रातिशाख्यस्य ३-४ अध्याययोः निम्नाङ्कितसूत्रविषयाः-

तृतीयाध्याये - १–४०, ४२-४५, ४८, ५६, ६४, ७०, ८०, ८५, ८६, ९६, ९७, १११, १२०, १३४-१४५, १५० तमञ्चेति ६९ सूत्राणि तथा -

चतुर्थाध्याये - १-२०, २९, ३३, ३४, ३६, ३७, ४१, ४५, ४६, ४८, ५०, ५२, ५३, ५६, ५९, ६०, ७९, ८९, ९१, ९३, ९४-१०४, १०८-१२२, १३१-१४१, १६६, १७४, १८०, १८८, १९१-१९५ तमञ्चेति ८४ सूत्रार्थाः ।

(घ) प्रकरणे

उव्वटभाष्यसहितस्य शु.य. प्रातिशाख्यस्य ५-८ अध्यायेषु निम्नाङ्कितानि सूत्राणि -

पञ्चमाध्याये - १, ७, ८, १४, २६-२८, ३७-३९, तमश्चेति १० सूत्राणि ।

षष्ठाध्याये - १, २, ३, ४, ६, ११, १२, १४, २५, २७, तमश्चेति १० सूत्राणि ।

सप्तमाध्याये - १-१२, सूत्राणि तथाऽष्टमाध्याये १, ६, ७ सूत्राणि चेति ।

(ङ) प्रकरणे

शतपथब्राह्मणस्य प्रथमकाण्डस्य सायणभाष्यसहितस्य निम्नाङ्किता विषयाः

प्रथमाध्याये-

व्रतोपायनहविर्निर्वापपवित्रच्छेदनकृष्णाजिनादानफलीकरणान्तो विधिः ।

द्वितीयाध्याये - पेषणादिवेदिकरणान्तो विधिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृतीयाध्याये-
स्रुक्सम्मार्जनजुह्वादिष्ववयवकल्पनेध्मादिप्रोक्षणपरिधिनिधान-
सामिधेन्यनुवचनसंख्याविधानान्तो विधिश्चेति ।

पाठ्यग्रन्थाः

१- शुक्लयजुर्वेदमाध्यन्दिनसंहितायां महीधरभाष्यम् ११-१५ अध्यायान्तम् ।

२- शुक्लयजुः प्रातिशाख्यम् ३-८ अध्यायान्तम् ।

३- शतपथब्राह्मणम् - १-३ अध्यायान्तं सायणभाष्योपेतम् ।

सहायकग्रन्थाः

(क) काण्वभाष्यम् ।

(ख) ऋग्वेदप्रातिशाख्यम् ।

(ग) शतपथब्राह्मणस्य दीनानाथभूमिका ।

शिक्षणविधिः

१- पाठ्यांशस्योद्देश्यप्रदर्शनपूर्वकं ज्ञेयवस्तुपरिचयप्रदानम् ।

२- अनुबन्धचतुष्टयप्रदर्शनपूर्वकं पाठ्यांशावबोधनम् ।

३- निर्दिष्टप्रतीकादेर्व्याख्यानपूर्वकं प्रश्नोत्तररीत्या प्रबोधनम् ।

४- सम्बद्धशास्त्रीयविषयाणां विश्लेषणात्मकरूपेण प्रकाशनम् ।

५- अध्येतॄणां मध्ये परस्परसंवादप्रश्नानुप्रश्नसमाधानक्रमेण विषयबोधनम् ।

६- सम्बद्धयज्ञपात्राणां चित्रप्रदर्शनमुखेन परिज्ञापनम् ।

७- छात्राणां शङ्कासमाधानमुखेन निर्दिष्टविषयवस्तुबोधनम् ।

८. यथासम्भवं शुष्केष्टिरूपेण प्रयोगबोधनम् ।

✡

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नव्यव्याकरणम्

स्तरगतविषयशिक्षणोद्देश्यम्

लौकिकवैदिकशब्दप्रक्रियाज्ञानपूर्वकसव्याप्तिव्याकरणशास्त्रीयसिद्धान्त विवेचनसामर्थ्योत्पादनम् ।

पन्चमं पत्रम् **पूर्णाङ्काः १००**

पाठ्यांशनाम - परिभाषाविवेचनम् ।

प्रकरणविभाजनम्

(क) आदितो निर्दिश्यमानपरिभाषान्तम् २०

(ख) यत्रानेकविधमान्तर्यमिति परिभाषातः संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति इति परिभाषान्तम् २०

(ग) कृद्ग्रहणे गतिकारकेति परिभाषातः शब्दान्तरस्य प्राप्नुवन्विधिरनित्य इति परिभाषान्तम् २०

(घ) असिद्धं बहिरङ्गमन्तरङ्गे इति परिभाषातश्चानुकृष्टं नोत्तरत्र इति परिभाषान्तम् २०

(ङ) स्वरविधौ व्यञ्जनमविद्यमानवदिति परिभाषातः शितपा शपानुबन्धेनेति परिभाषान्तम् २०

पाठयवस्तुविवरणम्

(क) प्रकरणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१. व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्
२. यथोद्देशं संज्ञापरिभाषम्
३. कार्यकालं संज्ञापरिभाषम्
४. अनेकान्ता अनुबन्धाः
५. एकान्ताः
६. नानुबन्धकृतमनेकालत्वम्
७. नानुबन्धकृतमनेजन्तत्वम्
८. नानुबन्धकृतमसारूप्यम्
९. उभयगतिरिह भवति
१०. कार्यमनुभवन् हि कार्यी निमित्ततयानाश्रीयते ।
११. यदागमास्तद्गुणीभूता –
१२. निर्दिश्यमानस्यादेशा भवन्ति

(ख) प्रकरणे

१. यत्रानेकविधमान्तर्यम्
२. अर्थवद्ग्रहणे नानर्थकस्य –
३. गौणमुख्ययोर्मुख्ये –
४. एकयोगनिर्दिष्टानाम् –
५. क्वचिदेकदेशोप्य –
६. भाव्यमानेन सवर्णानाम् –
७. वर्णाश्रये नास्ति –
८. प्रत्ययग्रहणे यस्मात् –
९. उत्तरपदाधिकारे –
१०. स्त्रीप्रत्यये चानुपसर्जनेन –
११. संज्ञाविधौ प्रत्ययग्रहणे –

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ग) प्रकरणे

१. कृद्ग्रहणे गतिकारक –
२. पदाङ्गाधिकारे तस्य च –
३. व्यपदेशिवदेकस्मिन् –
४. यस्मिन् विधिस्तदादा –
५. सर्वो द्वन्द्वो विभाषा –
६. सर्वेविधयश्छन्दसि विकल्प्यन्ते
७. प्रकृतिवदनुकरणम् –
८. एकदेशविकृतमनन्यवत्
९. पूर्वपरनित्यान्तर –
१०. सकृद्गतौ विप्रतिषेधे –
११. विकरणेभ्यो नियमो –
१२. परान्नित्यं बलवत्
१३. शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति ॥

(घ) प्रकरणे

१. असिद्धं बहिरङ्गमन्तरङ्गे –
२. नाजानन्तर्ये बहिष्ट्व –
३. अन्तरङ्गानपि विधीन् –
४. वार्णादाङ्गं वलीयः
५. अकृतव्यूहाः –
६. येन नाप्राप्ते यो विधिरा –
७. पुरस्तादपवादा –
८. अनन्तरस्य विधिर्वा –
९. पूर्वं ह्यपवादा अभि –
१०. प्रकल्प्य चापवादविषयम् –
११. अभ्यासविकारेषु –

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१२. क्तल्युट्तुमुन्खलर्थेषु –
१३. उभयनिर्देश –
१४. प्रातिपदिकग्रहणे –
१५. नञिवयुक्तमन्य –
१६. गतिकारकोपपदाना –
१७. चानुकृष्टं नोतरत्र ।

(ङ) **प्रकरणे**

१. स्वरविधौ व्यञ्जन –
२. सन्निपातलक्षणो विधि –
३. सन्नियोगशिष्टानाम् –
४. तन्मध्यपतितस्तद् –
५. नञ्घटितमनित्यम्
६. प्रकृतिग्रहणे यङ्लुगन्त –
७. विधौ परिभाषोपतिष्ठते –
८. उपपदविभक्तेः कारक –
९. अनन्त्यविकारोऽन्त्य –
१०. सहचरितासहचरि –
११. श्रुतानुमितयो –
१२. लक्षणप्रतिपदोक्तयो –
१३. अभेदका गुणाः
१४. पर्जन्यवल्लक्षण –
१५. ज्ञापकसिद्धं न सर्वत्र
१६. औपदेशिकप्रायोगिकयोः –
१७ श्तिपा शपानुबन्धेन –

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाठ्यग्रन्थः

(क) परिभाषेन्दुशेखरः ।

षष्ठं पत्रम् **पूर्णाङ्काः १००**

पाठ्यांशनाम - न्यायसिद्धान्तविवेचनम्

प्रकरणविभाजनम्

(क)	अनुमानखण्डे आदितः पूर्वपक्षव्याप्तिनिरूपणान्तम्	२०
(ख)	सिद्धान्तपक्षव्याप्तिनिरूपणतः पक्षतानिरूपणान्तम्	२०
(ग)	सभेदहेत्वाभासनिरूपणम्	३०
(घ)	शब्दखण्डे प्रारम्भतो लक्षणानिरूपणान्तम्	२०
(ङ)	आसत्तिनिरूपणतस्तात्पर्यनिरूपणान्तम्	१०

पाठ्यग्रन्थः

(क) न्यायसिद्धान्तमुक्तावलीसहिता कारिकावली ।
(अनुमानशब्दखण्डे)

शिक्षणविधिः

१. प्रथमद्वितीयपत्रयोः कृते अवलम्बनीया विधयः
(अ) व्याख्याविधिः (आ) प्रश्नोत्तरविधिः
(इ) प्रयोगविधिः (ई) आगमनविधिः
(उ) निगमनविधिश्च ।

२. अन्येषां पत्राणां कृते अवलम्बनीया विधयः
(अ) व्याख्याविधिः, (आ) प्रवचनविधिः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(इ) तुलनाविधिः, (ई) प्रश्नोत्तरविधिः,
(उ) आगमनविधिः (ऊ) निगमनविधिश्च ।

मूल्याङ्कनविधिः

१. **प्रश्नपत्रनिर्माणे अवधेयानि निदर्शनानि**

(क) प्रश्नपत्रे पाठ्यांशस्य समग्रप्रकरणानां प्रश्नाः समाविष्टा भवितुर्महन्ति ।

(ख) प्रश्नानामङ्कभारः पाठ्यांशप्रकरणविभाजनेन प्रश्नोत्तरेण च सङ्गतः स्यात् ।

(ग) भाषा सुस्पष्टा शुद्धा च स्यात् ।

(घ) प्रश्ना निर्धारितसमये उत्तरार्हाः स्युः ।

(ङ) प्रश्नपत्रे प्रश्नाः सामान्याः गम्भीरा गम्भीरतराश्चेति सन्तुलिताः स्युः ।

(च) प्रश्ना उत्तरदाने ग्रन्थाद् यथावदुद्धरणीया न स्युः ।

✡

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धान्तज्यौतिषम्

स्तरगतविषयशिक्षणोद्देश्यम्

१. अनुपातसिद्धान्तानामवबोधने धरातलीयगणितवासनाविवेचने,

२. चापजात्यचापाजात्यसिद्धान्तप्रतिपादने तेषां फलसाधने,

३. व्यक्ताव्यक्तगणितविषयकसूत्राणामुपपत्तिप्रदर्शने,

४. गोलीयक्षेत्रवासनावबोधने तदाधारे ज्यौतिषविषयकसिद्धान्तानां प्रतिपादने,

५. त्रैकोणमित्या त्रिभुजे निर्दिष्टावयवानां ज्ञानाच्छेषावयवज्ञाने तथा भूखस्थवस्तूनामन्तरौच्च्यसाधने,

६. मन्दोच्चशीघ्रोच्चोपपत्तिज्ञाने कुदिनाधिमासानां वासनाविवेचने,

७. ग्रहस्पष्टीकरणे दिग्देशकालानां ज्ञाने तथा चन्द्रसूर्यग्रहणवासना-परिज्ञाने,

८. ग्रहच्छायोदयास्तचन्द्रश्रृङ्गोन्नतिग्रहयुतिभग्रहयुतिपातानां संसाधने तदुपपत्तिवर्णने,

९. प्राचीनभूगोलवर्णने सौरसावननक्षत्रमाननां विवेचने स्पष्टभूपरिधिदेशान्तरचरान्तराक्षांशानां निर्धारणे ग्रहणवासनाविवेचने दृक्कर्मोपपत्तिसमीक्षणे,

१०. प्राचीनार्वाचीनपद्धत्या आकाशीयपिण्डानां गतिस्थित्यौच्च्यकक्षा-परिमाणस्वरूपवर्णने,

११. आकाशीयानां तथा भूस्थितानाञ्च वस्तूनामन्तरौच्च्यसाधने उपयोगिनां प्राचीनयन्त्राणां निर्माणे तत्प्रयोगे तथा निर्धारितानामाधुनिकयन्त्राणां प्रयोगे च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चमं पत्रम् **पूर्णाङ्काः १००**

पाठ्यांशनाम - दिग्देशकालपरिज्ञानं चन्द्रसूर्यग्रहण-चलनकलनञ्च ।

प्रकरणविभाजनम् -

(क) त्रिप्रश्नग्रहणच्छायोदयास्तशृङ्गोन्नति-ग्रहयुतिभग्रहयुतिपाताऽनयनविवेचनम् । ६०

(ख) चलनकलनम् । २०

(ग) वर्णनात्मकज्यौतिषम् । २०

पाठ्यांशविवरणम्

(क) प्रकरणे

(अ) ब्राह्ममतानुसारेण दिग्देशकालपरिज्ञानं, चन्द्रसूर्य-ग्रहणोपपत्तिवर्णनं, ग्रहोदयास्तचन्दशृङ्गोन्नतिग्रहयुतिभग्रहयुति पातसाधनवासनाप्रदर्शनम् ।

(ख) प्रकरणे

(अ) चलराशेस्तात्कालिकसम्बन्धपरिज्ञानम् ।

(ग) प्रकरणे

(अ) गणकपरिचयः ।

(आ) सिद्धान्तज्यौतिषस्य प्राचीनार्वाचीनसिद्धान्तविवेचनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाठ्यग्रन्थाः

(क) सिद्धान्तशिरोमणिः भास्कराचार्यकृतः
(त्रिप्रश्नाधिकारात् पाताधिकारान्तो भागः)

(ख) चलनकलनम् सुधाकरद्विवेदिकृतम् ।

(ग) ज्योतिर्विज्ञानम् - अर्कसोमयाजिना धूलिपालेन विरचितम् ।
(आदितो लम्बनाधिकारपर्यन्तम्)

सहायकग्रन्थाः

(क) गणकतरङ्गिणी सुधाकरद्विवेदी

(ख) सौरपरिवारः डा. गोरखप्रसादः

(ग) ग्रहनक्षत्राणि सम्पूर्णानन्दः

सन्दर्भग्रन्थौ

(क) ब्रह्माण्ड र सौरमण्डल मोतीकाजी स्थापित

(ख) भारतीय ज्यौतिष शङ्करबालकृष्ण दीक्षित ।

षष्ठं पत्रम् **पूर्णाङ्काः - १००**

पाठ्यांशनाम - गोलीयग्रहगणितं वास्तवचन्द्रशृङ्गोन्नति-साधनं ब्रह्माण्डस्वरूपवर्णनञ्च ।

प्रकरणविभाजनम्

(क) भास्करकृतं गोलाध्यायविवेचनम् । ५०

(ख) वास्तवचन्द्रशृङ्गोन्नतिसाधनम् । ३०

(ग) वर्णनात्मकज्यौतिषम् २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाठ्यवस्तुविवरणम्

(क) प्रकरणे

(अ) भास्करकृतस्य सिद्धान्तशिरोमणिग्रन्थस्य गोलाध्यायस्थविषयाणां वर्णनं तदुपपत्तिप्रदर्शनञ्च ।

(ख) प्रकरणे

(अ) चन्द्रशृङ्गोन्नतिसाधने मतान्तरप्रदर्शनपुरःसरं वास्तचन्द्रशृङ्गोन्नतिसाधनम् ।

(ग) प्रकरणे

(अ) चन्द्राधिकारः ।

(आ) ग्रहणसमीक्षणम् ।

(इ) यन्त्रपरिचयस्तत्प्रयोगश्च ।

(ई) ब्रह्माण्डस्वरूपवर्णनम् ।

पाठ्यग्रन्थाः

(क) सिद्धान्तशिरोमणिः (गोलाध्यायः) भास्कराचार्यकृतः ।

(ख) वास्तवचन्द्रशृङ्गोन्नतिसाधनम् सुधाकरद्विवेदी ।

(ग) ज्योतिर्विज्ञानम् अर्कसोमयाजिना श्रीधूलिपालेन रचितम् । (चन्द्राधिकारादवशिष्टो भागः)

सहायकग्रन्थौ

(क) सौरपरिवारः डा. गोरखप्रसादः ।

(ख) अर्वाचीनं ज्योर्तिविज्ञानम् रमानाथसहायः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सन्दर्भग्रन्थौ

(क) ब्रह्माण्ड र सौरमण्डल — मोतीकाजी स्थापित ।

(ख) भारतीय ज्योतिष — शङ्करबालकृष्ण दीक्षित ।

शिक्षणविधिः

(क) अध्याप्यविषये औत्कण्ठ्योत्पादनम् ।

(ख) पाठ्यविषये आधारभूतविषयाणां वर्णनम् ।

(ग) व्याख्यानेन व्यावहारिकोदाहरणेन सम्बद्धविषयकचित्रप्रदर्शनेन, समीकरणस्थापनेन उपयुक्तशैक्षिकसामग्रीप्रदर्शनेन च विषयवस्तुप्रतिपादनम् ।

(घ) दूरवीक्षणयन्त्रप्रयोगेण ग्रहनक्षत्राणां वेधेन चित्रपटप्रदर्शनेन पाठितविषये प्रश्नोत्तरेण अध्यापितविषयाणां टिप्पण्यादिप्रदानेन सहायकसन्दर्भपुस्तकानां पत्रपत्रिकाणाञ्च निर्देशनेन वेधशालादीनां निरीक्षणेन च ज्ञातव्यविषयाणां स्पष्टीकरणम् ।

(ङ) गृहकार्यप्रदानेन प्रश्नोत्तरेण यथावसरलब्धेन आकाशीयचमत्कारावलोकनेन चार्जितज्ञानस्य स्थिरीकरणम् ।

✡

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

फलितज्यौतिषम्

स्तरगतविषयशिक्षणोद्देश्यम्

(क) उच्चस्तरीयजन्मपत्रिकानिर्माणप्रकारज्ञानम्,

(ख) जन्मकालिकग्रहस्थित्यनुसारेण जातकस्य शुभाशुभफलादेशकरणे समर्थाया जनशक्तेरुत्पादनम्,

(ग) सामुद्रिकशास्त्रयुक्त्या नरशरीरस्य शुभाशुभलक्षणज्ञानम्,

(घ) प्रश्नलग्नवशात् फलादेशे सामर्थ्योत्पादनम्,

(ङ) ताजिकोक्तप्रकारेण फलज्ञानम्,

(च) आवश्यकानां शुभाशुभमुहूर्तानां परिज्ञानम्,

(छ) गोलीयक्षेत्राणां सूत्राणां बिन्दूनाञ्च ज्ञानम्,

(ज) सूर्यसिद्धान्तोक्त्या ग्रहस्पष्टीकरणे ग्रहणादिसाधने च सामर्थ्योत्पादनम् ।

पञ्चमं पत्रम् **पूर्णाङ्काः १००**

पाठ्यांशनाम **ताजिकशास्त्रं पाराशरशास्त्रञ्च ।**

प्रकरणविभाजनम्

(क)	राशिग्रहस्वरूपादीनामध्ययनम् ।	२०
(ख)	सहमयोगादीनामध्ययनम् ।	२०
(ग)	वर्षमुथहाफलादीनामध्ययनम् ।	२०
(घ)	भावफलविचारः ।	२०
(ङ)	पाराशरशास्त्रम् ।	२०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाठ्यवस्तुविवरणम्

(क) प्रकरणे

संज्ञातन्त्रस्यादितो ग्रहयोगाध्यायान्तं यावत् ।

(ख) प्रकरणे

संज्ञातन्त्रस्यावशिष्टो भागः ।

(ग) प्रकरणे

वर्षतन्त्रस्यादितोऽरिष्टभङ्गाध्यायान्तं यावत् ।

(घ) प्रकरणे

वर्षतन्त्रस्यावशिष्टो भागः ।

(ङ) प्रकरणे

मध्यपाराशरी (समग्रा)

पाठ्यग्रन्थौ

(१)	ताजिकनीलकण्ठी	नीलकण्ठदैवज्ञः
(२)	मध्यपाराशरी	पराशरः

षष्ठं पत्रम् **पूर्णाङ्काः १००**

पाठ्यांशनाम **सूर्यसिद्धान्तगणितं गोलपरिभाषा च ।**

प्रकरणविभाजनम्

(क)	मध्यमग्रहसाधनम्	२०
(ख)	ग्रहस्फुटीकरणम्	२०
(ग)	त्रिप्रश्नगणितं ग्रहणगणितञ्च	३०
(घ)	छेद्यकादिज्ञानम्	२०
(ङ)	गोलपरिभाषाज्ञानम्	१०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाठ्यवस्तुविवरणम्

(क) प्रकरणे

सूर्यसिद्धान्तस्यादितो मध्यमाधिकारान्तं यावत् ।

(ख) प्रकरणे

सूर्यसिद्धान्तस्य स्पष्टाधिकारः ।

(ग) प्रकरणे

सूर्यसिद्धान्तस्य त्रिप्रश्नादितः सूर्यग्रहणाधिकारान्तं यावत् ।

(घ) प्रकरणे

सूर्यसिद्धान्तस्य छेद्यकाधिकारादवशिष्टो भागः ।

(ङ) प्रकरणे

गोलपरिभाषा ।

पाठ्यग्रन्थौ

(१)	सूर्यसिद्धान्तः	
(२)	गोलपरिभाषा	सीताराम झा

सहायकग्रन्थौ

(१)	सिद्धान्तशिरोमणिः	भास्कराचार्यः
(२)	गोलबोधः	नयराजपन्तः

शिक्षणविधिः

(क) अध्येतव्यविषयस्य परिचयप्रदानम् ।

(ख) सम्बद्धविषयाणां विश्लेषणात्मकरूपेणोपस्थापनम् ।

(ग) प्रश्नोत्तररूपेण पुनरावृत्तिर्बोधः परीक्षणञ्च ।

(घ) गृहकार्यप्रदानेन लेखाभ्याससम्पादनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नव्यन्यायः

स्तरगतं विषयशिक्षणोद्देश्यम्

१. व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावघटितव्याप्तिस्वरूपप्रतिपादनम्, एतेन विविधव्याप्तिप्रयोगसामर्थ्यसम्पादनञ्च,

२. ईश्वरसिद्धिः, तत्स्वरूपपरिज्ञानम्, ईश्वरानङ्गीकर्तॄणां विविधाऽऽक्षेपाणां परिहारश्च,

३. वैशेषिकाणां मूलसिद्धान्तानां परिज्ञानम्,

४. सामान्यलक्षणसन्निकर्षतत्प्रयोगविषयकबोधद्वारा प्रत्यक्षानुमित्यादिज्ञानेषु वैशिष्ट्यसम्पादनम्,

५. हेत्वाभासस्वरूपतत्प्रयोगपरिज्ञानेन शास्त्रेषु लोके च तत्त्वनिर्णयविषयप्राप्तिचातुर्यसम्पादनम्,

६. न्यायावयवस्वरूपबोधनेन वादजल्पादिषु स्वमतस्थापनतत्स्थिरीकरणचातुर्याऽऽधानम्,

७. न्यायसिद्धान्तबोधसम्पादनम् ।

पञ्चमं पत्रम् **पूर्णाङ्काः १००**

पाठ्यांशनाम **न्यायावयवविचारः**

प्रकरणविभाजनम्

(क) न्यायलक्षणविवेचनम् २०

(ख) अवयवलक्षणनिरूपणम् २०

(ग) उभयघटकभागद्वयाघटितत्वघटितावयवलक्षणनिर्वचनम् २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(घ) अन्यूनानतिरिक्तपदघटितं प्रतिज्ञालक्षणव्याख्यानम् २०
(ङ) लिङ्गविषयकपदघटितप्रतिज्ञालक्षणनिरूपणम् २०

पाठ्यवस्तुविवरणम्

(क) प्रकरणे

न्यायपूर्वपक्षलक्षणं तन्निरासश्च, चिन्तामणिकृतं न्यायलक्षणम्, तद्व्याख्यानम्, न्यायलक्षणपदव्यावृत्तिः, दीधितिकृतोचितानुपूर्वीकेत्यादिलक्षणव्याख्यानम् ।

(ख) प्रकरणे

चिन्तामणिकृतमवयवलक्षणम्, तद्व्याख्यानम्, तत्पदव्यावृत्तिश्च ।

(ग) प्रकरणे

दीधितिकृतं प्रतिज्ञाद्यघटकत्वे सति उभयघटकभागद्वयाघटितत्वमिति लक्षणस्य व्याख्यानम्, तत्पदव्यावृतिश्च, परामर्शस्य न्यायतदवयवलक्षणातिव्याप्तिप्रदर्शनं तन्निरसनञ्च ।

(घ) प्रकरणे

दीधितिकृतस्य पक्षतावच्छेदकविशिष्ट इत्यादि प्रतिज्ञालक्षणस्य व्याख्यानम्, चिन्तामणिकृत्प्रतिज्ञालक्षणव्याख्यानम्, तत्र पदव्यावृत्तिकथनम्, अन्यूनानतिरिक्तपदनिवेशेन प्रतिज्ञालक्षणनिर्वचनम् ।

(ङ) प्रकरणे

लिङ्गविषयकत्वस्य ज्ञाने विशेषणात् प्रतिज्ञालक्षणकथनम्, लिङ्गविषयकत्वस्य लिङ्गपदस्य च व्याख्यानम्, हेत्वभिधानेत्यादिलिङ्गविषयकलिङ्गिविषयकेत्यादि मणिकृतं लक्षणद्वयञ्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाठ्यग्रन्थः

गादाधरीयुतावयवप्रकरणम् (प्रतिज्ञालक्षणनिर्वचनान्तम्)

सहायकग्रन्थौ

१- न्यायसूत्रवात्स्यायनभाष्ये न्यायवयवविवेचनम् ।

२- जयन्तभट्टकृतन्यायमञ्जर्याम् अवयवविवेचनम् ।

सन्दर्भसामग्री

१- केशवमिश्रकृततर्कभाषाया आचार्यबदरीनाथशुक्लकृतव्याख्यायां न्यायावयवविवेचनम् ।

२- अवयवप्रकरणे ज्वालाप्रसादगौडकृता भूमिका ।

षष्ठं पत्रम् **पूर्णाङ्काः १००**

पाठ्यांशनाम **न्यायसिद्धान्तसमीक्षणम् ।**

प्रकरणविभाजनम्

(क)	न्यायपदार्थोद्देशः	२०
(ख)	संशयादिपरीक्षा	२०
(ग)	प्रमेयपरीक्षा	२०
(घ)	प्रवृत्त्यादिपरीक्षा	२०
(ङ)	जातिनिग्रहस्थानपरीक्षा	२०

पाठ्यवस्तुविवरणम्

(क) प्रकरणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रमाणानां परतःप्रामाण्योपस्थापनम्, षोडशपदार्थानामुद्देशस्तेषां स्वरूपज्ञानम्, प्रमाणलक्षणं तद्विभागश्च, प्रमाणभेदलक्षणानि, प्रमेयलक्षणम् तद्भेदाश्च, संशयादिपदार्थानां लक्षणानि ।

(ख) प्रकरणे

संशयपरीक्षा, प्रमाणं तद्भेदानाञ्च परीक्षा, प्रमाणचतुष्ट्वव्यवस्थापनम्, शब्दस्य नित्यानित्यत्वविचारः, पदलक्षणम्, शब्दार्थनिरूपणम् ।

(ग) प्रकरणे

प्रमेयलक्षणान्तर्गतत्वेन आत्मविवेचनम्, शरीरविवेचनम्, इन्द्रियविवेचनम्, अर्थविवेचनम्, बुद्धिविवेचनम्, मनोविवेचनम्, शरीरस्यादृष्टजन्यत्वप्रतिपादनम् ।

(घ) प्रकरणे

प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गपरीक्षाः, तत्त्वज्ञानफलम्, अवयविविवेचनम्, परमाणुविवेचनम्, शून्यवादखण्डनम्, तत्त्वज्ञानोत्पत्तिप्रकारः, तत्सिद्धिः, जल्पवितण्डाप्रयोजनम् ।

(ङ) प्रकरणे

जातिनिरूपणम्, निग्रहस्थाननिरूपणञ्च ।

पाठ्यग्रन्थः

न्यायसूत्रम् वात्स्यायनभाष्योपेतम् ।

सहायकग्रन्थौ

१- जयन्तभट्टकृतन्यायमञ्जरी ।

२- विश्वानाथकृतन्यायसूत्रवृत्तिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सन्दर्भग्रन्थौ

१- केशवमिश्रकृततर्कभाषाया आचार्यबदरीनाथशुक्लकृता व्याख्या ।

२- चूडानाथभट्टरायकृतो न्यायप्रदीपः ।

शिक्षणविधिः

१- सङ्गत्यनुबन्धादिप्रदर्शनेन प्रतिपाद्यविषयाणां बोधनम्

२- नव्यन्यायग्रन्थेषु भूरिप्रयुक्तानां पारिभाषिकशब्दानां सोदाहरणं व्याख्यानं छात्राणां तत्राभ्यासश्च ।

३- प्रकृतविषयप्रतिपादनसन्दर्भे तद्बोधसौकर्याय प्रत्यक्षदर्शनविधेः (चित्रदर्शनविधेः) समुपयोगः ।

४- स्वाधीतविषयज्ञानदार्ढ्याय परीक्षालेखसौकर्याय च प्रश्नोत्तरविधेरङ्गीकरणम् ।

✡

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राचीनन्यायवैशेषिकम्

स्तरगतविषयशिक्षणोद्देश्यम्

१- न्यायवैशेषिकदर्शनशब्दत्रयार्थक्षमतोत्पादनम्,

२- स्वशास्त्रीयभौतिकाध्यात्मिकपदार्थानां यथार्थज्ञाने कुशलता-सम्पादनम्,

३- प्रमाणप्रमेयादिव्युत्पादनक्षमतोत्पादनम्,

४- विभिन्नवादप्रतिवादक्षमतोपार्जनम्,

५- पदतदर्थसम्बन्धज्ञानोत्पादनम्,

६- तत्तद्ग्रन्थवैशिष्ट्यग्रन्थकारपरिचयज्ञानसामर्थ्योत्पादनञ्च ।

पञ्चमं पत्रम् **पूर्णाङ्काः १००**

पाठ्यांशनाम

१- प्रमाणचतुष्टयनिरूपणम् ।

२- न्यायसंमतपदार्थोद्देशतल्लक्षणनिरूपणम् ।

प्रकरणविभाजनम्

(क)	मेयसिद्धिप्रधानभूतस्य प्रत्यक्षस्य निरूपणम्	२०
(ख)	अनुमानोपमानप्रमाणप्रमितिनिरूपणम्	१०
(ग)	शब्दप्रमाणस्य शाब्दबोधस्य च निरूपणम्	२०
(घ)	ग्रन्थग्रन्थकारपरिचयमुखेन प्रमाणानां व्यापकत्वदर्शनम्	२०
(ङ)	प्रमाणादिषोडशपदार्थलक्षणनिरूपणम्	३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाठ्यवस्तुविवरणम्

(क) प्रकरणे

१- मङ्गलाचरणम्, ग्रन्थप्रयोजनप्रदर्शनम्, यथार्थानुभवकरणत्वानि विविच्य निष्कृष्टप्रमाणलक्षणोपपादनम्, प्रत्यक्षस्य साक्षात्काररूप-करणत्वमितिलक्षणकथनम्, प्रत्यक्षस्य निर्विकल्पकं सविकल्पकं चेति भेदोपपदानम्, तस्येश्वरानीश्वरसम्बन्धित्वेन नित्यानित्यत्वकथनम्, सविकल्पकप्रत्यक्षलक्षणघटकप्रकारताया ज्ञाततारूपत्वस्य भासमानवैशिष्ट्यप्रतियोगित्वरूपत्वस्य च खण्डनम्, इन्द्रियात्मकप्रत्यक्षप्रमाणस्य पुनर्द्विविधत्वकथनम्, चक्षुष्ट्वगादीन्द्रियप्रत्यक्षयोग्यद्रव्यगुणादिपरिगणनम्, मनसः सर्वविषयकस्यापि बहिर्ज्ञानजनने परतन्त्रत्वकथनम् ।

२- संयोगादिसन्निकर्षषट्कोपपादनम्, महदुद्भूतरूपालोकसंयोगस्य सहकारिणोऽभावात् अन्धकारस्य घटस्याप्रत्यक्षत्वोपपादनम्, द्रव्यचाक्षुषं प्रति आलोकसयोगस्य कारणत्वप्रतिपादनम्, अभावस्य केवलाधिकरणत्वं निरस्य तस्यान्योन्याभावादिभेदोपपादनम्, चक्षुरादिषडिन्द्रियाणां लक्षणनिरूपणम्, मनसोऽणुत्वसाधनम्, संयोगस्य द्विविधत्वकथनञ्च ।

(ख) प्रकरणे

अनुमितिकरणमित्यनुमानलक्षणघटकाऽनुमितेरनुमितित्वं तत्करणत्वं च लक्षयित्वा मीमासकसौगतचार्वाकपूर्वपक्षान् निरस्य स्वमतेन व्याप्तिलक्षणनिरूपणम्, सामान्यलक्षण-प्रत्यासत्त्योपस्थापितसकलवह्निधूमेषु व्याप्तिग्रहदर्शनम् व्याप्यतावच्छेदकघटितमीमांसकलक्षणं निरस्यानुमानस्य व्याप्तिप्रकारकलक्षणोपपादनम्, अनुमानस्य केवलान्वय्यादिभेदेन त्रैविध्यवर्णनम्, हेत्वाभासनिरूपणम्, प्रसङ्गादुपाधिनिरूपणम् उपमाननिरूपणञ्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ग) प्रकरणे

शाब्दकरणशब्दप्रमाणघटकशाब्दत्वस्य परिष्कृतलक्षणनिरूपणम्, शब्दे वैशेषिकमतसूचनम्, सङ्केत एव शक्तिरिति शक्तिलक्षणग्रहस्य निरूपणम्, व्यवहारादीनां शक्तिग्रहोपायत्ववर्णनम्, जातिशक्तिवादिमतनिरसनम्, अन्त्ये पदमात्रे शक्तिरिति निर्धारणम्, शक्तेरभिधाया वृत्तित्वेनैवार्थप्रत्यायकत्वम्, वृत्तिश्च शक्तिलक्षणाऽन्यतररूपेति निर्वचनम्, शुद्धा गौणी चेति भेदोपपादनेन लक्षणाया निरूपणम्, गच्छ गच्छसीत्यादौ व्यञ्जनायाः स्वतन्त्रवृत्तिर्नावाश्यकत्वोपपादनम्, आख्यातस्य यत्ने शक्तिरितिनिरूपणं तत्सम्बन्धिविविधविषयनिरूपणञ्च, शाब्दबोधहेतुविध्यर्थज्ञानस्य प्रवर्तकत्वादि विविधविषय-विश्लेषणञ्च ।

(घ) प्रकरणे

जानकीनाथस्य देशकालादीतिवृत्तपरिचयः,
सकलशास्त्रीयप्रमाणप्रमेयसिद्धीनां प्रमाणाधीनत्वदर्शनम्,
न्यायस्य लोके शास्त्रे चोदाहरणोपस्थापनम्,
न्यायस्येश्वरस्यैव सर्वोपरि पूज्यतादर्शनम्, लोके शास्त्रे चोपमानप्रयोदर्शनम्, प्रमाणस्य न्यायस्य च क्षेत्रभेदोपस्थापनञ्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ङ) प्रकरणे

प्रमाण्यग्रहोपायानां प्रमाणफलस्य च निरूपणम्, षोडशपदार्थानामुद्देश:, संशयादीनां पृथग्वचनोपयोगवर्णनम्, वितण्डाया: प्रयोजनविचार:, पञ्चावयवनिरूपणस्य तर्कनिरूपणस्य चोपयोगकथनम्, निग्रहस्थानेभ्यो हेत्वाभासानां पृथग्वचने हेतुकथनम्, अपवर्गे तत्त्वज्ञानस्य क्रमेणोपयोगकथनम्, मिथ्याज्ञानानां स्वरूपं तत्फलञ्च, शास्त्रप्रवृत्तेस्त्रैविध्यकथनम्, प्रमाणस्य विभाग: प्रत्यक्षादिप्रमाणविशेषाणां लक्षणोदाहरण-निरूपणम्, अपवर्गान्तात्मादिद्वादशविधप्रमेयस्य लक्षणादिनिरूपणम्, सिद्धान्तसंशयादिपदार्थानां लक्षणनिरूपणम्, दशावयववादिमत-निरसनपूर्वकं पञ्चावयवानां लक्षणनिरूपणम्, छलपरीक्षा-सहिततर्कादिनिग्रहस्थानान्तपदार्थानां लक्षणादिवर्णनञ्च

पाठ्यग्रन्थौ

१- क, ख, ग, घ, प्रकरणानां कृते न्यायसिद्धान्तमञ्जरी जानकीनाथविरचिता (संम्पूर्णा) यादवाचार्यकृतन्यायमञ्जरी साराख्यटीकायुता ।

२- ङ प्रकरणस्य कृते वात्स्यायनभाष्यसहितं न्यायदर्शनम् (प्रथमाध्यायमात्रम्) ।

सहायकग्रन्था:

१-	भारतीय दर्शन	- बलदेव उपाध्याय
२-	दर्शनशास्त्रको इतिहास	- उमेश मिश्र
३-	न्यायपरिचय	- फणिभूषण
४-	न्यायभाष्यम्	-ढुण्डिराजशास्त्रिकृतहिन्दीटीकासहितम्
५-	वात्स्यायनभाष्यं	- भाष्यचन्द्रटीकायुतम् ।
६.	न्यायदीप	- प्रा. चूडानाथ भट्टराय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षष्ठं पत्रम् **पूर्णाङ्काः १००**

पाठ्यांशनाम - **न्यायसंमतषोडशपदार्थपरीक्षणम् ।**

प्रकरणविभाजनम्

(क)	प्रमाणसामान्यपरीक्षा	२०
(ख)	आत्मादिमनोऽन्तप्रमेयपरीक्षा	२०
(ग)	प्रवृत्त्याद्यपवर्गान्तपरीक्षादितत्त्वज्ञानोत्पत्तिसंरक्षणोपायाः	२०
(घ)	जातिनिग्रहस्थानपरीक्षा	२०
(ङ)	ग्रन्थग्रन्थकृत्परिचयः	२०

पाठ्यवस्तुविवरणम्

(क) प्रकरणे

संशयपरीक्षणम्, संशयपरीक्षायाः प्राथम्ये युक्तिः, प्रमाणसामान्यपरीक्षणम्, प्रत्यक्षप्रमाणपरीक्षणम्, अवयविपरीक्षणम्, अनुमानपरीक्षणम्, उपमानपरीक्षणम्, शब्दप्रमाणपरीक्षणम्, अर्थवादनिरूपणम्, अनुवादस्य रूपप्रतिपादनं तस्य पुनरुक्तिभिन्नत्वप्रतिपादनञ्च, वेदस्य प्रमाणत्वसाधनम्, प्रमाणस्य चतुष्ट्वप्रतिपादनम्, ऐतिह्यसंभवादीनां प्रमाणान्तरत्वनिरसनम्, शब्दस्यानित्यत्वसाधनम्, पदस्यार्थविवेचनञ्च ।

(ख) प्रकरणे

आत्मनो देहेन्द्रियाद्यतिरिक्तत्वसाधनम्, आत्मनो नित्यत्वसाधनम्, शरीरपरीक्षा, इन्द्रियपरीक्षा, अर्थपरीक्षणम्, बुद्धिपरीक्षणम्, अत्र विषये सांख्यमतखण्डनम्, मनसः परीक्षणम्, सांख्यजैनमतनिराकरणञ्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ग) प्रकरणे

प्रवृत्तिदोषप्रत्यभावपरीक्षणम्, व्यक्ताद् व्यक्तोत्पत्तेः साधनम्, जगदुत्पत्तिविषये बौद्धवेदान्तिचार्वाकमतखण्डनम्, सांख्याना-मेकान्तवादखण्डनम्, फलपरीक्षणम्, दुःखपरीक्षणम्, अपवर्ग-परीक्षणम्, तत्त्वज्ञानस्य विषयविवेचनम्, प्रकारान्तेणावयववि-साधनम्, सर्वाभावात्मकप्रलयखण्डनम्, परमाणुस्वरूपनिरूपणम्, तत्त्वज्ञानोत्पत्तिसाधननिरूपणम्, समाधिसत्तोपपादनम्, यम-नियमादीनामपवर्गसधानत्वनिरूपणम्, जल्पादेः तत्त्वज्ञान-परिक्षणावश्यकत्वप्रदर्शनञ्च ।

(घ) प्रकरणे

साधर्म्यवैधर्म्यादीनां चतुर्विंशतिजातीनामुद्देशलक्षणोदाहरणानां प्रदर्शनम्, प्रतिज्ञाहान्यादिद्वाविंशतिनिग्रहस्थानानानामुद्देश-लक्षणोदाहरणानां प्रदर्शनञ्च ।

(ङ) प्रकरणे

न्यायसूत्रस्य न्यायभाष्यस्य च वैशिष्ट्यप्रदर्शनम्, सूत्रभाष्यकृतोः स्थानसमयादिप्रदर्शनञ्च ।

पाठ्यग्रन्थः

वात्स्यायनभाष्यसहितं न्यायदर्शनम् ।
(द्वितीयाध्यायतः समाप्तिपर्यन्तम् ।)

सहायकग्रन्थाः

१- वात्स्यायनभाष्यसहितन्यायदर्शनम् ।
(भाष्यचन्द्रटीकायुतम् ।)
२- न्यायपरिचय - फणिभूषण
३- सभाष्यन्यायदर्शनम् - ढुण्डिराजशास्त्रिकृतहिन्दीटीकायुतम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिक्षणविधिः

१- उदाहरणमुखेन यथावश्यकं श्यामपट्टचित्रशलाकादिप्रयोगेण च छात्राणां पूर्वावश्यकज्ञानग्रहणधारणानुरूपं शिक्षणम् ।

२- सूत्रश्लोकानामावृत्तिस्तात्पर्यज्ञानञ्च सूत्रकारिकात एव तदर्थतात्पर्यबोधनक्षमतोत्पादनम् ।

३- प्राचीनन्यायवैशेषिकशास्त्रे प्रसिद्धानां द्रव्यं गुणः कर्म सत्ता क्षणभङ्गः, अवयवी, सविकल्पम्, इत्यादिपारिभाषिक-शब्दानामर्थबोधनम् ।

४- तेषु पारिभाषिकशब्देषु, पाठ्यग्रन्थसम्बद्धविविधविषयेषु च लघुटिप्पणीनिबन्धलेखने प्रवचनानि प्रश्नोत्तराणि, तेषां संशोधनानि च ।

५- स्वशास्त्रीयविषये पूर्वोत्तरपक्षेषु लघुप्रश्नोत्तरप्रशिक्षणेन तत्तद्विषयपरिचयदातृत्वसम्पादनाय गुरुशिष्यसंवादः ।

६- सतीर्थ्यैर्यथासंभवं दर्शनान्तराध्यायिभिश्च छात्रैः सह शास्त्रार्थप्रतियोगिताकरणाय छात्राणामभ्यासश्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साहित्यम्

स्तरगतविषयशिक्षणोद्देश्यम्

(क) लक्षणात्मनां लक्ष्यात्मनाञ्च पाठ्यवस्तूनामध्ययनेन साहित्यशास्त्रे साहित्यिकरचनासु च व्युत्पन्नाया जनशक्तेरुत्पादनम् ।

(ख) वाच्यार्थलक्ष्यार्थव्यङ्ग्यार्थबोधे निपुणानां प्रबुद्धानां स्नातकानां समुत्पादनम् ।

(ग) साहित्यिककृतीनां समालोचने क्षमाया जनशक्तेरुत्पादनम् ।

(घ) संस्कृतमूलकभाषासाहित्यतत्त्वावबोधे समर्थाया जनशक्तेरुत्पादनञ्च ।

पञ्चमं पत्रम् **पूर्णाङ्काः १००**

पाठ्यांशनाम - साहित्यशास्त्राध्ययनं महाकाव्याध्ययनञ्च ।

प्रकरणविभाजनम्

(क)	काव्यस्वरूपविवेचनं वृत्तिनिरूपणञ्च ।	२०
(ख)	आर्थव्यञ्जनानिरूपणं रसविचारश्च	२०
(ग)	ध्वनिविमर्शः	२०
(घ)	व्यञ्जनास्थापनं चित्रकाव्यनिरूपणञ्च	२०
(ङ)	महाकाव्याध्ययनम्	२०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाठ्यवस्तुविवरणम्

(क) प्रकरणे

१- काव्यप्रयोजनम्, काव्यकारणम्, काव्यलक्षणम्, काव्यभेदाः, शब्दभेदाः, अर्थभेदाः, संकेतग्रहः, अभिधालक्षणम्, सभेदा लक्षणा, सभेदा व्यञ्जना च ।

पाठ्यस्थलम् - काव्यप्रकाशस्य (१-२ उल्लासौ)

(ख) प्रकरणे

१- सभेदोदाहरणार्थव्यञ्जना, अविवक्षितवाच्यध्वनिः, विवक्षितान्य-परवाच्यध्वनिः, असंलक्ष्यक्रमव्यङ्ग्यध्वनिः, रससूत्रविषयकविभिन्ना-चार्यमतानि, शृङ्गारादिरसभेदाः, सोदाहरणाः, स्थायिभावा, व्यभिचारिभावाः, भावध्वनिः, रसाभासाः, भावाभासाः, भावशान्त्यादयश्च ।

पाठ्यस्थलम् - काव्यप्रकाशस्य तृतीयउल्लासः सम्पूर्णः चर्तुर्थोल्लासस्य भावशान्त्यादिनिरूपणान्तो भागः ।

(ग) प्रकरणे

१- ध्वनिविवेचनक्रमे शब्दशक्त्युद्भवध्वनिः, अर्थशक्त्युद्भवध्वनिः, उभयशक्त्युद्भवध्वनिः, ध्वनिभेदाः, गुणीभूतव्यङ्ग्यभेदाश्च ।

पाठ्यस्थलम् - काव्यप्रकाशस्य चतुर्थोल्लासस्य शब्दशक्त्युद्भवध्वनिनिरूपणप्रसङ्गादारभ्य पञ्चमोल्लासस्य गुणीभूतव्यङ्ग्यनिरूपणान्तो भागः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(घ) प्रकरणे

१- विविधध्वन्यर्थबोधे व्यञ्जनाया आवश्यकत्वप्रतिपादनम्, अभिहितान्वयवादिमतनिरासः, अन्विताभिधानवादिमतखण्डनम् भट्टलोल्लटादिमतखण्डनम्, वाच्यार्थाद् व्यङ्ग्यार्थस्य पार्थक्यम्, लक्षणातो व्यञ्जनाया वैलक्षण्यम्, वेदान्तिमतनिरासः, वैयाकरणमतखण्डनम् नैयायिकसम्मतानुमाने व्यञ्जनाया अनन्तर्भावः, शब्दार्थचित्रविचारश्च ।

पाठ्यस्थलम् - काव्यप्रकाशस्य पञ्चमोल्लासस्य व्यञ्जनास्थापनप्रसङ्गतः षष्ठोल्लासपर्यन्तो भागः ।

(ङ) प्रकरणे

१- शिशुपालवधमहाकाव्यस्य तृतीयचतुर्थसर्गस्थपद्यानां पदपंक्तिव्याख्यानपुरःसरं कलात्मकं भावात्मकञ्चाध्ययनम्

२- महाकवेर्माघस्य देशाकालकृत्यात्मकः परिचयस्तदीयं काव्यवैशिष्ट्यञ्च ।

३- निर्धारितपाठ्यांशमधिकृत्य कथावस्तुपात्रचित्रणप्रकृतिचित्रणसंबद्धं ज्ञानम् ।

पाठ्यग्रन्थौ

१- काव्यप्रकाशः (१-६ उल्लासाः) मम्मटरचितः

२- शिशुपालवधम् (३-४ सर्गौ) माघकृतम्

सहायकग्रन्थाः

१- संस्कृतसाहित्येतिहासः - रामचन्द्रमिश्रः

२- संस्कृत साहित्य का इतिहास - बलदेव उपाध्याय

३- संस्कृत साहित्य का इतिहास - वाचस्पति गैरौला

४- संस्कृत साहित्य का इतिहास - ए.वी.कीथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षष्ठं पत्रम् **पूर्णाङ्काः १००**

पाठ्यांशनाम - लक्षणशास्त्रनिरूपणं महाकाव्यानुशीलनञ्च

प्रकरणविभाजनम्

(क)	दोषविवेचनम्	२०
(ख)	गुणरीतिशब्दालङ्कारनिरूपणम्	२०
(ग)	उपमाद्यर्थालङ्कारनिरूपणम्	२०
(घ)	काव्यलिङ्गाद्यर्थालङ्कारनिरूपणम्	२०
(ङ)	महाकाव्यानुशीलनम्	२०

पाठ्यवस्तुविवरणम्

(क) प्रकरणे

१- दोषलक्षणम्, दोषभेदाः, पददोषाः, वाक्यदोषाः, पदांशदोषाः, अर्थदोषाः, रसदोषाः, दोषाणां नित्यानित्यता, रसदोषस्यापवादाः, अलङ्कारदोषविमर्शः रसदोषपरिहारस्य प्रकाराश्च ।

२- निर्धारितदोषाणां लक्षणोदाहरणानि पार्थक्यञ्च ।

पाठ्यस्थलम् - काव्यप्रकाशस्य ७ (सप्तमः) उल्लासः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ख) **प्रकरणे**

१- गुणस्वरूपम्, अलङ्कारस्वरूपम्, गुणालङ्कारविभेदः, गुणत्रयलक्षणानि, प्राचीनोक्तगुणानां नवीनमतेऽन्तर्भावादि-व्यवस्था, गुणानां वर्णव्यञ्जकत्वम् ।

२- शब्दालङ्काराः (चित्रालङ्कारं विहाय) रीतिवृत्तिव्यवस्था च ।

३- निर्धारितालङ्काराणां लक्षणोदाहरणानि, शब्दार्थालङ्कार-वैभिन्न्यम्, अलङ्काराणां परस्परं विभेदश्च ।

पाठ्यस्थलम् - काव्यप्रकाशस्य ८-९ उल्लासौ ।

(ग) **प्रकरणे**

१- अर्थालङ्कारेषूपमादयो भाविकान्ता अलङ्काराः ।

२- निर्धारितालङ्काराणां भेदा लक्षणोदाहरणानि मिथःपार्थक्यञ्च ।

स्थलनिर्देशः - काव्यप्रकाशस्य दशमोल्लासस्यारम्भतो भाविकालङ्कारपर्यन्तो भावाः ।

(घ) **प्रकरणे**

१- काव्यलिङ्गादयः सङ्करान्ता अलङ्काराः ।

२- निर्धारितालङ्काराणां भेदा लक्षणोदाहरणानि मिथःपार्थक्यञ्च ।

३- काव्यप्रकाशकर्तुर्मम्मटस्य परिचयः काव्यशास्त्रे तदीयं योगदानञ्च ।

स्थलनिर्देशः- काव्यप्रकाशस्य दशमोल्लासस्य काव्यलिङ्गादि समाप्तिपर्यन्तो भागः ।

(ङ) **प्रकरणे**

१- कवेः सुकृतिदत्तपन्तस्य परिचयो वैशिष्ट्यञ्च ।

२- कार्तवीर्योदयमहाकाव्यस्य वैशिष्ट्यम् ।

३- कृतवीर्यदत्तात्रेयसंवादः, गुरुपरामर्शतः कृतवीर्यस्य राज्याभिषेकः, कृतवीर्यद्वारा पुत्रायोपदेशः, कृतवीर्यस्य तपोवन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गमनम्, कुण्डिननगरसौन्दर्यम्, स्वयंवरोपक्रमाय भोजनृपतेः कन्यायाः कनकप्रभाया रूपगुणप्रशंसा च ।

४- कार्तवीर्योदयमहाकाव्यस्याष्टमनवमसर्गस्थपद्यानां पदपङ्क्तिव्याख्यानं भावार्थप्रकाशनं प्रकृतिचित्रणं पात्रचित्रणं विषयवस्तुवर्णनञ्च ।

पाठ्यग्रन्थौ

१- काव्यप्रकाशः (७-१० उल्लासाः) मम्मटकृतः

२- कार्तवीर्योदयम् (८-९ सर्गौ) सुकृतिदत्तपन्तप्रणीतम् राजकीयप्रज्ञाप्रतिष्ठान, कमलादी, काठमाडौं ।

सहायकग्रन्थाः

१- संस्कृतसाहित्येतिहासः रामचन्द्रमिश्रः

२- संस्कृतवाङ्मय; संक्षिप्त अध्ययन हंसपुरे सुवेदी

३- अलङ्कारानुशीलनम् डा. राजवंशसहाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिक्षणविधिः

१- साहित्यशिक्षणक्रमे पदपङ्क्तिव्याख्यानं तुलनात्मक विवेचनं प्रश्नोत्तरं, सामूहिकविमर्शश्चेत्यादयो विधयः समाश्रयणीयाः ।

२- लक्ष्यलक्षणग्रन्थाध्ययने यथासम्भवं निर्धारितपाठ्यपुस्तकेषु लक्ष्यलक्षणान्वेषणं विधातव्यम् । यथा अलङ्काराणामध्यापने संबद्धमहाकाव्येषु तेषामुदाहरणानि गवेषणीयानि ।

३- लेखाभ्यासे विशेषयत्नः सम्पादनीयः ।

४- व्याख्यायामन्वयपर्यायसन्दर्भच्छन्दोऽलङ्कारकोषसमास-व्याकरणव्युत्पत्तिनिदर्शनं यथासम्भवं कार्यम् ।

५- साहित्यिककृतीनामध्ययने समीक्षात्मकं विवेचनं कर्तव्यम् । विशेषतस्तृतीयखण्डे महाकाव्याध्ययने पदप्रयोगालङ्कार-विन्यासरससन्निवेशप्राकृतिकवर्णनेषु समालोचनात्मकं निरूपणमावश्यकं मन्यते ।

६- अध्यापने प्रश्नपत्रनिर्माणे च पाठ्यवस्तुविवरणं सर्वदाऽनुसरणीयम् ।

✡

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इतिहासपुराणम्

स्तरगतविषयशिक्षणोद्देश्यम्

१- पुराणानां वर्ण्यविषयस्योपयोगिताविषये प्रौढज्ञानसम्पादनक्षमत्वम् ।

२- पुराणगतानां रहस्यात्मकविषयाणां ज्ञानार्जनम् ।

३- इतिहासपुराणशैलीज्ञानसम्बन्ध्याऽऽवश्यकक्षमतासम्पादनम् ।

४- पौराणिकविषयाणां व्याख्यानसामर्थ्यसम्पादनम् ।

पन्चमं पत्रम् **पूर्णाङ्काः १००**

पाठ्यांशनाम - **प्रियव्रतादिचरितम्, श्रीकृष्णचरितम्, राजवंशवर्णनञ्च ।**

प्रकरणविभाजनम्

(क)	प्रियव्रतादिचरितम्	२०
(ख)	श्रीकृष्णचरितम्	२०
(ग)	श्रीकृष्णचरितम्	२०
(घ)	श्रीकृष्णचरितम्	२०
(ङ)	राजवंशवर्णनम्	२०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाठ्यवस्तुविवरणम्

(क) प्रकरणे

प्रियव्रतचरितम्, आग्नीध्रचरितम्, नाभेश्चरितम्, ऋषभदेवचरितम्, भरतचरितञ्च ।

(ख) प्रकरणे

कृष्णावतारोपक्रमः, श्रीकृष्णप्रादुर्भावः, योगमायाविर्भावः, श्रीकृष्णस्य जातकर्मादिसंस्कारः, पूतनावधः, शकटभङ्गः, तृणावर्तवधः, यमलार्जुनोद्धरणम्, अघासुरवधः, ब्रह्मस्तुतिः, कालीयदमनञ्च ।

(ग) प्रकरणे

कालीयस्य यमुनाह्रदे निवासहेतुनिरूपणम्, प्रलम्बासुरवधः, प्रावृष्च्छरदो वर्णनम्, चीरहरणम्, इन्द्रमखभङ्गः, गोवर्धनोद्धरणम्, वेणुगीतम्, रासोत्सवारम्भः, गोपीगीतम्, महारासवर्णनम् ।

(घ) प्रकरणे

अघासुरवधः, युग्मगीतम्, अरिष्टासुरवधः, केशिवधः, रामकृष्णयोर्मथुराप्रस्थानम्, अक्रूरकृता भगवत्स्तुतिः, धनुर्भङ्गः, कुवलयापीडवधः, चाणूरादिवधः, कंसवधः, रामकृष्णयो-रुपनयनम्, गुरुकुलवासः, उद्धवगोपीसंवादः, भ्रमरगीतम्, कुब्जामनोरथपूर्तिश्च ।

(ङ) प्रकरणे

वैवश्वतमनुवंशवर्णनम्, इक्ष्वाकुवंशवर्णनम्, मान्धातृ-खट्वाङ्गयोर्वंशवर्णनम्, निमिचरितम्, जह्नोश्चरितम्, ययातिचरितम्, यदुवंशवर्णनम्, भविष्यत्कालिक-राजवंश्रावर्णनम्, मगधवंशवर्णनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाठ्यग्रन्थाः

१-	श्रीमद्भागवतम् (पञ्चमस्कन्धे १-९ अध्यायाः)	वेदव्यासप्रणीतम्
२-	श्रीमद्भागवतम् (दशमस्कन्धस्य पूर्वार्द्धः सम्पूर्णः)	वेदव्यासप्रणीतम्
३-	विष्णुपुराणम् (चतुर्थोऽशः सम्पूर्णः)	वेदव्यासप्रणीतम्

सहायकग्रन्थाः

१-	रासपञ्चाध्यायी	हरिवक्ष जोशी
२-	कल्याण	श्रीमद्भागवतविशेषाङ्कः
३-	भागवतमञ्जरी	कुलचन्द्रगौतमः
४-	गर्गसंहिता	

सन्दर्भग्रन्थाः

१-	भारतीय वाङ्मय मे श्रीराधा	बलदेव उपाध्याय
२-	पुराणपरिशीलनम्	पं. गिरिधरशर्मा चर्तुर्वेदी
३-	पुराणविमर्शः	बलदेव उपाध्यायः

षष्ठं पत्रम् **पूर्णाङ्काः १००**

पाठ्यांशनाम - मन्वन्तरवर्णनम्, देवीचरितम्, राजवंशानुचरितञ्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकरणविभाजनम्

(क)	चटकोत्पत्यादिनिरूपणम्	१५
(ख)	मदालसादिचरितम्	२०
(ग)	योगादिनिरूपणम्, मन्वन्तरवर्णनञ्च	२०
(घ)	देवीमाहात्म्यम्, मन्वन्तरर्णानञ्च	२५
(ङ)	राजवंशवर्णनम	२०

पाठ्यवस्तुविवरणम्

(क) प्रकरणे

जैमिनेश्चत्वारः प्रश्नाः, वपुः शापः, चटकोत्पत्तिनिरूपणम्, विन्ध्यवर्णनम्, चतुर्युगावतारः बलदेवब्रह्महत्या, द्रौपदेयोत्पत्तिः, हरिश्चन्द्रोपाख्यानम्, आडिबकयुद्धम्, पितापुत्रसंवादे संसारचक्रवर्णनम्, जीवगतिनिरूपणम्, महारौरवादिनरकवर्णनम्, मोक्षमार्गनिरूपणम्, पातिव्रत्यधर्म-प्रभाववर्णनम्, अनसूयाचरितम्; दत्तात्रेयोपाख्यानम् ।

(ख) प्रकरणे

मदालसोपाख्यानारम्भः, मदालसापरिणयः, पतिविरहाया मदालसायाः प्राणत्यागः, कुवलयाश्वचरितम्, मदालसाप्राप्तिः, ऋतध्वजचरितम्, मदालसयाऽलर्काय प्रवृत्तिमार्गानुशासनम्, श्राद्धकल्पवर्णनम्, सदाचारनिरूपणम्, स्त्रीधर्मवर्णनम्, आशौचनिरूपणम्, आत्मतत्त्वनिरूपणम् ।

(ग) प्रकरणे

योगनिरूपणम्, प्राणायामप्रकारनिरूपणम् ॐकार-माहात्म्यम्, योगचर्या, सुबाहुकाशीराजयोरुपाख्यानम्, सृष्टिनिरूपणम्, दौः सहोत्पत्तिः, स्वायम्भुवमन्वन्तरवर्णनम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वीपवर्णनम्, गङ्गावतारः कूर्मसन्निवेशः, भुवनकोशवर्णनम्, कलिवरुथिनीसंवादः, स्वारोचिषमन्वन्तरवर्णनम्, औत्तम-मन्वत्तरवर्णनम्, रैवतमन्वन्तरवर्णनम्, चाक्षुषमन्वन्तरवर्णनम्, वैवश्वतमन्वन्तरवर्णनम्, वैवश्वतोत्पत्तिश्च ।

(घ) प्रकरणे

राज्ञः सुरथस्य वनगमनम्, तस्य समाधिना वैश्येन सह संवादः, मधुकैटभाख्यानम, ब्रह्मकृता भगवतीस्तुतिः, देवानां तेजोभिर्देव्याः प्रादुर्भावः, महिषासुरसैन्यवधः, महिषासुरवधः, शक्रादिस्तुतिः, चण्डमुण्डाभ्यां महिषासुर-सन्निधौ देव्याः स्त्रीरत्नत्वनिवेदनम्, देवीदूतसंवादः, धुम्रलोचनवधः, चण्डमुण्डवधः, रक्तबीजवधः, निशुम्भवधः, शुम्भासुरवधः, देवैः कृता नारायणीस्तुतिः देवीचरितं तस्या माहात्म्यवर्णनञ्च, देव्या सुरथवैश्ययोर्वरप्रदानम्, रौच्यमन्वन्तरवर्णनम्, भौत्यमन्वन्तरवर्णनञ्च ।

(ङ) प्रकरणे

सूर्यमाहात्म्यम्, सूर्यसन्ततिवर्णनम्, छायासंज्ञयोश्चरितम्, शनैश्चरोत्पत्तिः, पृषध्रोपाख्यानम्, नाभागचरितम् भलन्दन-चरितम्, खनित्रचरितम्, खनिनेत्रचरितम्, करन्धमचरितम्, अवीक्षितश्चरितम्, मरुत्त्वरितम्, नरिष्यन्तचरितम्, दम-चरितम्, वपुष्मतश्चरितम्, पुराणमाहात्म्यनिरूपणञ्च ।

पाठ्यग्रन्थाः

१- मार्कण्डेयपुराणम् — वेदव्यासप्रणीतम् (सम्पूर्णम्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सहायकग्रन्थाः

१-	मार्कण्डेयपुराण एक अध्ययन	बदरीनाथ शुक्ल
२-	अष्टादशपुराणपरिचयः	डा. श्रीकृष्णमणित्रिपाठी
३-	पुराणविमर्शः	बलदेव उपाध्यायः

सन्दर्भग्रन्थाः

१-	पौराणिकराजर्षिवंशवर्णनसमीक्षा	डा. श्रीकृष्णमणित्रिपाठी
२-	पुराणदिग्दर्शनम्	माधवाचार्यशास्त्री

शिक्षणविधिः

१- व्याख्यानपद्धतिः ।

२- पूर्वज्ञानसम्पादनसूचककोणात्मकप्रश्नाः ।

३- छात्राणां प्रेरणोत्पादनायोदाहरणमुखेन विषयाणां विवेचनम् ।

४- अनुबन्धचतुष्टयनिरूपणमुखेन विषयवस्तूपस्थापनम् ।

५- वैदिकपौराणिकाख्यानानां सरलरीत्या व्याख्यानम् ।

६- तुलनात्मकरीत्या पाठ्यविषयाणां विवेचनम् ।

७. सत्यावश्यके कृष्णपट्टे चित्रादिप्रदर्शनम् ।

८- लेखनपद्धतेर्विकासाय छात्रेभ्यो लेखाभ्यासाय प्रेरणम् ।

९- छात्रेभ्यो गृहकार्यप्रदानम् ।

१०- कक्षायां मौखिकप्रश्नोत्तरप्रणाल्या विषयावबोधनम् ।

११- पाठ्यांशगतविषयाणां संक्षेपेण विवेचनं, पाठान्तरेण सह सम्बन्धप्रदर्शनञ्च ।

१२- पठितपाठस्य सारांशप्रदर्शनम् ।

१३- विवेचनात्मकमध्यापनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वमीमांसा

स्तरगतविषयशिक्षणोद्देश्यम्

१- धर्मप्रमाणविवेचनम्,
२- शास्त्रीयकर्मभेदविषयकं ज्ञानम्,
३- श्रुतिलिङ्गादिप्रमाणषट्कसहितशेषशेषित्वविवेचनम्,
४- प्रयोज्यप्रयोजकभावज्ञानम्,
५- श्रौतयाज्ञिकपदार्थपरिभाषाज्ञानम्,
६- धर्मलक्षणनिरूपणम्,
७- मीमांसाशास्त्रानुसारिप्रमाणस्वरूपज्ञानम्,
८- दर्शपौर्णमासेष्टिज्ञानम्,
९- मीमांसाशास्त्रानुसारं मन्त्रादिवेदविभागज्ञानम्,
१०- वेदापौरुषेयत्वस्य ज्ञानम्,
११- मीमांसाविषयस्य ज्ञानेन शास्त्रीयविषयप्रतिपादनम्,

पञ्चमं पत्रम् **पूर्णाङ्काः १००**

पाठ्यांशनाम - अर्थवादादिप्रामाण्यविवेचनम् ।

प्रकरणविभाजनम्

(क) अर्थवादस्मृतिप्रामाण्यादिविचारः २०
(ख) नामधेयप्रामाण्यादिनिरूपणम् २०
(ग) अपूर्वस्याऽऽख्यातप्रतिपाद्यत्वनिरूपणाद् व्यवेताननुषङ्गाधिकरणान्तं प्रकरणम् । २०
(घ) अङ्गापूर्वाभेदाधिकरणतः सौभरनिधनयोः काम्यैक्याधिकरणान्तं प्रकरणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ङ) ग्रहागतायाःज्योतिष्टोमाङ्गतानिरूपणात्
सर्वशाखाप्रत्येककर्मताधिकरणनिरूपणान्तं प्रकरणम् २०

पाठ्यवस्तुविवरणम्

(क) प्रकरणे

अकार्यबोधकवाक्यप्रामाण्यनिरूपणम्, विधिवन्निगदाधिकरणम्, हेतुवन्निगदाधिकरणम्, मन्त्रलिङ्गाधिकरणम्, स्मृतिप्रामाण्यनिरूपणम्, श्रुतिप्राबल्याधिकरणम्, दृष्टमूलकस्मृतेरप्रामाण्यनिरूपणम्, पदार्थप्राबल्याधिकरणम्, शास्त्रप्रसिद्धपदार्थप्रामाण्याधिकरणम्, आर्यप्रसिद्धिविरोधे म्लेच्छप्रसिद्धेरप्रामाण्यनिरूपणम्, कल्पसूत्रस्यास्वतः- प्रामाण्याधिकरणम्, सामान्यश्रुतिकल्पनाधिकरणम्, साधुपदप्रयोगविचारः, आकृतिशक्त्यधिकरणनिरूपणम् ।

(ख) प्रकरणे

उद्भिदादिशब्दानां यागनामताऽधिकरणम्, चित्रादिशब्दानां यागनामधेयताऽधिकरणम्, तत्प्रख्याधिकरणम्, तद्व्यपदेशाधिकरणम् वाजपेयादिशब्दानां नामधेयत्वनिरूपणम्, आग्नेयादीनामनामताऽधिकरणम्, बर्हिरादिशब्दानां जातिवाचिताऽधिकरणम्, प्रोक्षण्यादिपदानां यौगिकताऽधिकरणम्, निर्मन्थ्यशब्दस्य यौगिकत्वाधिकरणम्, वैश्वदेवादिशब्दानां नामधेयत्वनिरूपणम्, वैश्वानराधिकरणम्, यजमानशब्दस्य प्रस्तरादिस्तुत्यर्थताऽधिकरणम्, आग्नेयादीनां ब्राह्मण्यादिस्तुत्यर्थताऽधिकरणम्, यूपादिशब्दानां यजमान-स्तुत्यर्थत्वनिरूपणम्, अपशवादिशब्दानां गवादि-प्रसंशार्थताऽधिकरणम्, भूमाधिकरणतः सामर्थ्यानुसारेणावस्थितानां व्यवस्थाधिकरणान्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ग) प्रकरणे

प्रथमद्वितीयाध्याययोः संगतिविचारः, अपूर्वस्याऽऽख्यात-पदप्रतिपाद्यत्वनिरूपणम्, यागस्वर्गातिरिक्तमपूर्वमस्ति न वेति विचारः, कर्मणां गुणप्रधानभावविभागाधिकरणम्, संमार्जनादीनामप्रधानताऽधिकरणम् स्तोत्रादिप्राधान्याधि-करणम्, मन्त्रविधायकत्वाधिकरणम्, मन्त्रनिर्वचनाधिकरणम्, ब्राह्मणनिर्वचनाधिकरणम्, ऊहाद्यमन्त्रताऽधिकरणम्, ऋग्ल-क्षणाधिकरणम्, सामलक्षणनिरूपणविचारः, यजुर्लक्षण-निरूपणविचारः, निगदानां यजुष्ट्वाधिकरणम्, एक-वाक्यत्वाधिकरणम्, वाक्यभेदाधिकरणाद् व्यवेताननुषङ्गाधि-करणान्तम् ।

(घ) प्रकरणे

अङ्गापूर्वभेदाधिकरणम्, समिदाद्यपूर्वभेदाधिकरणम्, आघारा-द्याग्नेयादीनामङ्गाङ्गिभावविचारः, उपांशुयाजापूर्वताऽधिकरणम्, आघाराद्यपूर्वताऽधिकरणम्, पशुसोमापूर्वताऽधिकरणम्, संख्या-कृतकर्मभेदाधिकरणम्, संज्ञाकृतकर्मभेदाधिकरणम्, देवताभेद-कृतकर्मभेदाधिकरणम्, द्रव्यविशेषानुक्तिकृतकर्मैक्याधिकरणम् दध्यादिद्रव्य-सफलत्वाधिकरणम्, वारवन्तीयादीनां कर्मा-न्तरताऽधिकरणम्, सौभरनिधनयोः काम्यैक्याधिकरणम् ।

(ङ) प्रकरणे

ग्रहाग्रताया ज्योतिष्टोमाङ्गताऽधिकरणम्, अवेष्टेः क्रत्वन्त-रताऽधिकरणम्, आधानस्य विधेयत्वनिरूपणम्, दाक्षा-यणादीनां गुणताऽधिकरणम्, द्रव्यदेवतायुक्तानां यागान्त-रताऽधिकरणम्, वत्सालम्भनादीनां संस्कारताऽधिकरणम्, नैवारचरोराधानार्थताऽधिकरणम्, त्वाष्ट्रपत्नीवतस्य पर्यग्नि-करणगुणकत्वाधिकरणम्, अदाभ्यादीनां ग्रहनामताऽधिकरणम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

